# 7 - सप्तम दशकम्

# हिरण्यगर्भ उत्पत्तिः

एवं देव चतुर्दशात्मक जगद् रूपेण जातः पुनः
तस्योर्ध्वं खलु सत्यलोक निलये जातोऽसि धाता स्वयं ।
यं शंसन्ति हिरण्य गर्भ मखिल त्रैलोक्य जीवात्मकं
योऽभूत् स्फीत रजो विकार विकसन् नाना सिसृक्षा रसः ॥ ॥7-1॥

सोऽयं विश्व विसर्ग दत्त हृदयः सम्पश्यमानस् स्वयं
बोधं खल्व नवाप्य विश्व विषयं चिन्ताकुलस् तस्थिवान् ।
तावत् त्वं जगतां पते तप तपेत् येवं हि वैहायसीं
वाणी मेन मशिश्रवश् श्रुति सुखां कुर्वंन् तपः प्रेरणाम् ॥ ॥7-2॥

कोऽसौ मामवदत् पुमानिति जलापूर्णे जगन् मण्डले
दिक्षू द्वीक्ष्य किमप्य नीक्षितवता वाक्यार्थ मुत्पश्यता ।
दिव्यं वर्ष सहस्र मात्त तपसा तेन त्व माराधितः
तस्मै दर्शितवा नसि स्व निलयं वैकुण्ठ मेकाद्भुतम् ॥ ॥7-3॥

माया यत्र कदापि नो विकुरुते भाते जगद्भ्यो बहिः
शोक क्रोध विमोह साध्वस मुखा भावास्तु दूरं गताः ।
सान्द्रानन्द झरी च यत्र परम ज्योतिः प्रकाशात्मके
तत्ते धाम विभावितं विजयते वैकुण्ठ रूपं विभो ॥ ॥7-4॥

यस्मिन् नाम चतुर्भुजा हरिमणि श्यामा वदात त्विषः
नानाभूषण रत्न दीपित दिशो राज द्विमानालयाः ।

भक्ति प्राप्त तथा विधोन्नत पदा: दीव्यन्ति दिव्या जना:
तत्ते धाम निरस्त सर्वशमलं वैकुण्ठ रूपं जयेत् ॥ ॥7-5॥

नाना दिव्य वधू जनै रभिवृता विद्युल् लता तुल्यया
विश्वोन्मादन हृद्य गात्र लतया विद्योति ताशान्तरा ।
त्वत् पादांबुज सौरभैक कुतुकात् लक्ष्मीस् स्वयं लक्ष्यते
यस्मिन् विस्मय नीय दिव्य विभवं तत्ते पदं देहि मे ॥ ॥7-6॥

तत्रैवं प्रति दर्शिते निजपदे रत्नासना ध्यासितं
भास्वत् कोटि लसत् किरीट कटकाद् याकल्प दीप्राकृति ।
श्रीवत्साङ्कित मात्त कौस्तुभ मणि च्छायारुणं कारणं
विश्वेषां तव रूप मैक्षत विधिस् तत्ते विभो भातु मे ॥ ॥7-7॥

कालांभोद कलाय कोमल रुची चक्रेण चक्रं दिशाम्
आवृण्वान मुदार मन्द हसित स्यन्द प्रसन्नाननम् ।
राजत् कम्बु गदारि पङ्कज धर श्रीमद् भुजा मण्डलं
स्रष्टुस् तुष्टिकरं वपुस् तव विभो मद्रोग मुद्वासयेत् ॥ ॥7-8॥

दृष्ट्वा सम्भृत सम्भ्रम: कमलभू: त्वत् पाद पाथोरुहे
हर्षा वेश वशं वदो निपतित: प्रीत्या कृतार्थी भवन् ।
जानास्येव मनीषितं मम विभो ज्ञानं तदापादय
द्वैताद्वैत भवत् स्वरूप परमित् याचष्ट तं त्वां भजे ॥ ॥7-9॥

आताम्रे चरणे विनम्र मथ तं हस्तेन हस्ते स्पृशन्
बोधस्ते भविता न सर्ग विधिभिर् बन्धोऽपि सञ्जायते ।
इत्याभाष्य गिरं प्रतोष्य नितरां तच्चित्त गूढस् स्वयं
सृष्टौ तं समुदैरयस् स भगवन् उल्लास योल्लाघताम् ॥ ॥7-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥

STOTRADHWANI